718

Shree Raghunath Sanskrit Research Institute Library,
Jammu

No. ७१३ - घ

Title पंचदशीव्याख्या तात्पर्यबोधनी

Author रामकृष्णः

Extent ३ Age

Subject वेदान्तशास्त्रम् · सम्पूर्णम्

713

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नं० ७१३-५

पंचदश्यां पञ्चमो महावाक्यविवेका-
ख्यो दीपः समाप्तः

नं० ७१३-५

पत्राणि ३ (त्रीणि) ३ पत्र

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नं० ८९३८

पञ्चदशीव्याख्या
तात्पर्यबोधिनी

(महावाक्यविवेक पर्यन्त
प्रकरण)

३ पत्राणि

वेदान्तशास्त्र
[illegible]

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

महावाक्य श्रीगणेशाय नमः ॥ ॥ नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ ॥ महावाक्यविवेकस्य कुर्वे व्या विवेकः ॥
॥२॥ ख्यां समासतः ॥१॥ मुमुक्षोर्मोक्षसाधनब्रह्मात्मैकत्वावगतिसिद्धये प्रसिद्धानां चतुर्णां महावा
क्यानामर्थं क्रमेण निरूपयन्नृपरमहंसपात्नुग्राचार्य आदावैतरेयारण्यकगते प्रज्ञानं ब्रह्मेति
महावाक्ये प्रज्ञानशब्दस्यार्थमाह ॥ येनेक्षतद्वृत्ति ॥ येन चक्षुर्द्वारा निर्गतांतःकरणवृत्त्युपहितचैतन्ये
न दृष्टं दर्शनयोग्यं रूपादिकमीक्षते पश्यति पुरुषस्तथा श्रोत्रद्वारा निर्गतांतःकरणवृत्त्युपाधिकेन ये

येनेक्षते शृणोतीदं जिघ्रति व्याकरोति च ॥ स्वाद्वस्वादु विजानाति तत्प्रज्ञानमुदीरितं ॥१॥

न शब्दजातं शृणोति तथैव घ्राणद्वारा निर्गतांतःकरणवृत्त्युपहितेनोपाधिकेन गंधजातं जिघ्र येन
ति येन वागिंद्रियावच्छिन्नेन व्याकरोति शब्दजातं व्याहरति येन रसनेंद्रियद्वारा निर्गतांतःकरण
वृत्त्युपाधिकेन स्वादु स्वादु रसो विजानाति अनुक्तसमुच्चयार्थश्चशब्दः तथा चोक्तानुक्तैः सकलें ॥१॥
द्रियैरंतःकरणवृत्तिभेदैर्योपलक्षितं यच्चैतन्यमस्ति तदेवात्र प्रज्ञानमित्युच्यत इत्यर्थः ॥ अनेन ये
CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative
न वा पश्यतीत्यादेः सर्वाण्येवैतानि प्रज्ञानस्य नामधेयानीत्यंतस्यावांतरवाक्यसंदर्भस्यार्थः संक्षिप्य दर्शितः ॥१॥

एवं प्रज्ञानशब्दस्यार्थमभिधाय ब्रह्मशब्दार्थमाह ॥ चतुर्मुखेति ॥ उत्तमेषु देवादिषु मध्यमेषु मनुष्येषु अधमेषु अश्वगवादिषु देहधारिषु आकाशादिषु भूतेषु च जगज्जन्मादिहेतुभूतं यदेकं चैतन्यमस्ति तद्ब्रह्मेत्यर्थः ॥ अनेन च एष ब्रह्मैष इन्द्र इत्यादेः प्रज्ञाप्रतिष्ठेत्यंतस्यावांतरवाक्यस्यार्थः ॥ संक्षिप्य दर्शितः इत्थं पदार्थमभिधाय वाक्यार्थमाह ॥ अत इति ॥ यतः सर्वत्रावस्थितं प्रज्ञानं ब्रह्म अतो मय्यपि स्थितं प्रज्ञानं ब्रह्मैव प्रज्ञानत्वाविशेषादित्यर्थः ॥२॥ एवं ऋक्शाखागतम

चतुर्मुखेन्द्रदेवेषु मनुष्याश्वगवादिषु ॥ चैतन्यमेकं ब्रह्मातः प्रज्ञानं ब्रह्म मय्यपि ॥२॥

परिपूर्णः परात्मास्मिन्देहे विद्याधिकारिणि ॥ बुद्धेः साक्षितया स्थित्वा स्फुरन्नहमितीर्यते ॥३॥

हावाक्यार्थं निरूप्य यजुःशाखास्थमध्ये बृहदारण्यकोपनिषद्गतस्याहं ब्रह्मास्मीति महावाक्यस्यार्थविवरणाय अहंशब्दस्यार्थमाह ॥ परिपूर्ण इति ॥ परिपूर्णः स्वभावतो देशकालवस्तुभिरपरिछिन्नः परमात्मास्मिन्मायाकल्पिते जगति विद्याधिकारिणि शमादिसाधनसंपन्नत्वेन विद्यासंपादनयोग्ये अस्मिं श्रवणाद्यनुष्ठानवति देहे मनुष्यादिशरीरे बुद्धेर्बुद्ध्युपलक्षितस्य सूक्ष्मशरीरस्य साक्षितया ऽविकारित्वेनावभासकतया

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

महावा. स्थित्वाऽवस्थाय स्फुरन्प्रकाशमानोऽहमितीर्यते लक्षणयाऽहंपदेनोच्यत इत्यर्थः ॥३॥ ब्रह्मशब्दा-
॥२॥ र्थमाह ॥ स्वत इति ॥ स्वतः परिपूर्णः स्वभावतो देशकालाद्यनवच्छिन्नः एवंभूतः परमात्माऽत्रास्मिन्म-
२ हावाक्ये ब्रह्मशब्देन ब्रह्मेत्यनेन पदेन वर्णितः लक्षणयोक्त इत्यर्थः ॥ एतद्वाक्यगतेनास्मीति पदेन
पदद्वयसामानाधिकरण्यलभ्यं जीवब्रह्मणोरैक्यं परामृश्यत इत्याह ॥ अस्मीति ॥ फलितमाह ॥
॥४॥ तेनेति ॥ इदानीं छान्दोग्यश्रुतिगतस्य तत्त्वमसीति वाक्यार्थप्रकाशनाय तत्पदलक्ष्यार्थमाह ॥

स्वतः पूर्णः परात्मात्र ब्रह्मशब्देन वर्णितः ॥ अस्मीत्यैक्यपरामर्शस्तेन ब्रह्म भवाम्यहं ॥४॥
एकमेवाद्वितीयं सन्नामरूपविवर्जितं ॥ सृष्टेः पुराऽधुनाप्यस्य तादृक्त्वं तदितीर्यते ॥५॥
श्रोतुर्देहेन्द्रियातीतं वस्त्वत्र त्वंपदेरितं ॥ एकता ग्राह्यतेऽसीति तदैक्यमनुभूयतां ॥६॥

एकमेवेति ॥ सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमिति वाक्येन सृष्टेः पुरा स्वगतादिभेदशून्यं
नामरूपरहितं यत्सद्वस्तु प्रतिपादितमस्य सद्वस्तुनोऽधुनापि सृष्ट्युत्तरकालेऽपि तादृक्त्वं विकार ॥२॥
रहितत्वाद्यतथात्वं ॥ तदिति पदेनेर्यते उच्यत इत्यर्थः ॥५॥ त्वंपदलक्ष्यार्थमाह ॥ श्रोतुरिति ॥ श्रोतुः
श्रवणाद्यनुष्ठानेन वाक्यार्थप्रतिपत्तुर्देहेन्द्रियातीतं देहेन्द्रियोपलक्षितस्थूलादिशरीरत्रयसाक्षि

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

तथा तद्विलक्षणं सद्वस्तु सदस्त्येव त्वंपदेरितं वाक्यगतेन त्वमिति पदेन लक्षितमर्थं लक्षये ॥ एतद्वाक्यस्थेनाऽसीति
पदेन तत्त्वंपदसामानाधिकरण्यलब्धं पदार्थद्वयैक्यं शिष्यं प्रति प्रत्याय्यत इत्याह ॥ एकतेति सिद्धमर्थमाह
तदैक्यमिति ॥ तयोस्तत्त्वंपदार्थयोरैक्यं प्रमाणसिद्धमेकत्वमनुभवतां मुमुक्षुभिरित्यर्थः ॥६॥ क्रमप्रा
प्तस्यार्थवलाद्वेदगतस्यायमात्मा ब्रह्मेति वाक्यस्यार्थस्याविर्भूताऽवयमात्मेति पदद्वयेन विवक्षितमर्थं क्र कि
मेण दर्शयति ॥ स्वप्रकाशेति ॥ अयमित्युक्तितोऽयमितिशब्देन स्वप्रकाशापरोक्षत्वं स्वयंप्रकाशत्वे

स्वप्रकाशापरोक्षत्वमयमित्युक्तितो मतं ॥ अहंकारादिदेहांतात्प्रत्यगात्मेति गीयते ॥७॥

नापरोक्षत्वं मतमभिमतं अहं करिष्ये इत्यपरोक्षत्वं घटादिविषयत्वं च व्यावर्त्तयितुं विशेषणद्वय
मिति बोद्धव्यं ॥ देहादिष्वप्यात्मशब्दप्रयोगदर्शनात् आत्मशब्देन किं विवक्षितमित्याकांक्षाया
माह ॥ अहंकारादिति ॥ अहंकार आदिर्यस्य अहंकारप्राणमनइंद्रियदेहसंघातस्य सोऽहंका
रादिः तथा देहो तो यस्य उक्तसंघातस्य स देहांतः अहंकारादिश्चासौ देहांतश्चेति तथा तस्मात्प्र

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

महावा०॥ त्यक् अधिष्ठानतया साक्षितया च आंतर आत्मेति गीयते ऽस्मिन्वाक्य इत्यर्थः ॥७॥ ब्राह्मण
॥३॥ त्वादिधर्मविशिष्टस्य शब्दस्य प्रयोगदर्शनान्तद्व्यावर्त्तनायात्र विवक्षितमर्थमाह ॥ दृश्यमान
3 स्येति ॥ दृश्यत्वेन मिथ्याभूतस्य सर्वस्याकाशादेर्जगतस्तत्त्वमधिष्ठानतया तद्बाधाव

दृश्यमानस्य सर्वस्य जगतस्तत्त्वमीर्यते ॥ ब्रह्मशब्देन तद्ब्रह्म स्वप्रकाशात्मरूपकं ॥८॥

धित्वेन च पारमार्थिकं सच्चिदानंदलक्षणं यद्रूपमस्ति तद्ब्रह्मशब्देनेर्यते कथ्यत इत्यर्थः ॥
वाक्यार्थमाह ॥ तद्ब्रह्मेति यदुक्तलक्षणं ब्रह्म स्वप्रकाशात्मा रूपं स्वरूपं यस्य तत्स्वप्रकाशा २॥
त्मरूपकं स एवेत्यर्थः ॥८॥ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीती
र्थविद्यारण्यमुनिवर्यकिंकरेण श्रीरामकृष्णाख्यविदुषा विरचिता महावाक्यविवे ॥३॥
कारव्याख्या समाप्ता ॥ ॥ दशमोदीपोसमाप्ता ॥ ॥ श्री ॥ ॥ ॥ श्री ॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative